# आर्धधातुकप्रक्रियाप्रवेशोपायः

# आर्धधातुकप्रक्रियाप्रवेशोपायः

**एतत् सम्यगधीत्य सार्वधातुकप्रत्ययानां सिद्धिः करणीया**

१. धातोर्विहिता लिट्, लुट्, ऌट्, आशीर्लिङ्, लुङ्, ऌङ्, इति षण्णां लकाराणां प्रत्यया आर्धधातुकसंज्ञकाः सन्ति। सिप् प्रत्यये लेट्लकारोऽपि आर्धधातुकसंज्ञकः।

२. धातोर्विहिताः शिद्भिन्ना येऽपि प्रत्ययाः सन्ति, ते सर्वेऽप्यार्धधातुकसंज्ञकाः भवन्ति।

**आर्धधातुकेषु प्रत्ययेषु किं किं न भवति ----**

१. धातूनां ये भ्वादि-दिवादि-तुदादीत्यादयो दश गणा उक्ताः, ते गणाः सार्वधातुकप्रत्ययकृते सन्ति। आर्धधातुकेषु प्रत्ययेषु तु 'कस्य गणस्य धातुरयम्' इति विचारोऽपि न करणीयो भवति। अत्र सर्वे समानाः।

२. सार्वधातुकेषु प्रत्ययेषु परतो ये विकरणाः शप्श्यन्नादयः, ते विकरणा आर्धधातुकेषु प्रत्ययेषु परतो न भवन्ति।

३. सार्वधातुकेषु प्रत्ययेषु येषां धातूनां स्थाने पा-पिब्, घ्रा-जिघ्र्, दा-यच्छ्, गम्-गच्छ्, इष्-इच्छ्, इत्यादय आदेशाः, ते आदेशा अपि आर्धधातुकेषु प्रत्ययेषु परतो न भवन्ति।

## आर्धधातुकलकाराः

**५. परोक्षे लिट्**(३.२.११५)- भूतानद्यतनपरोक्षेऽर्थे वर्तमानाद् धातोर्लिट् प्रत्ययो भवति। रामो बभूव। चकार। जहार।

**छन्दसि लिट्** - छन्दसि विषये धातोर्लिट् प्रत्ययो भवति। अहं सूर्यमुभयतो ददर्श। अहं द्यावापृथिवी आततान।

**६. अनद्यतने लुट्**(३.३.१५)- भविष्यदनद्यतनेऽर्थे वर्तमानाद् धातोर्लुट् प्रत्ययो भवति। देवदत्तः श्वः कर्ता। श्वो भोक्ता। (देवदत्त कल करेगा, कल खायेगा)।

**७. ऌट् शेषे च**(३.३.१३)- शुद्धे भविष्यति काले, चकारात् क्रियार्थायां क्रियायां चोपपदे, धातोर्ऌट् प्रत्ययो भवति। अद्य श्वो वा भविष्यति (=आज या कल होगा।)

**८. आशिषि लिङ्लोटौ** (३.३.१७३) - आशंसनमाशीः - अप्राप्तस्येष्टस्यार्थस्य प्राप्तुमिच्छा। आशीर्विशिष्टेऽर्थे वर्तमानाद् धातोर्लिङ्लोटौ प्रत्ययौ भवतः। यथा - चिरं जीव्याद् भवान्। आयुष्यं भूयात्। शत्रुर्म्रियात्। लोडपि - चिरं जीवतु भवान्।

**९. लुङ्** (३.२.११०) - भूतेऽर्थे वर्तमानाद् धातोर्लुङ् प्रत्ययो भवति। देवदत्तः अभूत्।

**१०. लिङ्निमित्ते ऌङ् क्रियातिपत्तौ** (३.३.१३९) - लिङ्निमित्ते भविष्यति काले ऌङ् प्रत्ययो भवति क्रियातिपत्तौ सत्याम्। सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत् (अच्छी वृष्टि होगी तो अच्छा अन्न होगा।)। भवान् घृतेन अभोक्ष्यत् यदि मत्समीपमासिष्यत् (आप मेरे साथ रहेंगे तो घी से खायेंगे।) दक्षिणेन चेदागमिष्यत्, न शकटं पर्याभविष्यत् (दक्षिण से आयेगा तो छकड़ा नहीं पलटेगा।)

**भूते च** (३.३.१४०) – भूते च काले लिङ्निमित्ते क्रियातिपत्तौ सत्यां लृङ् प्रत्ययो भवति। दृष्टो मया भवत्पुत्रोऽन्नार्थी, अपरश्च द्विजो ब्राह्मणार्थी। यदि स तेन दृष्टोऽभविष्यत्, तदाभोक्ष्यत (यदि उसने उसे देखा होता तो खिला दिया होता।)

५. **लिङर्थे लेट्** (३.४.७) – यत्र लि ङ् विधीयते, तत्र छन्दसि विषयेऽन्यतरस्यां लेट् भवति। जोषिषत्। तारिषत्। मन्दिषत्।

**उपसंवादाशङ्कयोश्च** (३.४.८)- उपसंवाद: परिभाषणम्, कर्तव्ये पणबन्ध:। यदि मे भवानिदं कुर्यात्, अहमपि भवत इदं दास्यामि, इत्येवंरूपम् (=तू ऐसा करे तो मैं भी ऐसा करूँ।) कारणत: कार्यानुसरणं तर्क:, उत्प्रेक्षा, आशङ्का।

उपसंवाद आशंकायां च गम्यमानायां छन्दसि विषये लेट् प्रत्ययो भवति। उपसंवादे - निहारञ्च हरासि मे निहारं निहराणि ते स्वाहा (=तू मुझे क्रेतव्य वस्तु दे, तो मैं भी तुझे दूँ।) आशंकायाम् - नेज्जिह्मायन्त्यो नरकं पताम (=कुटिल आचरण करते हुए कहीं हम नरक में न जा गिरें।)

**लेट्लकारो द्विविध: -**

सिब्बहुलं लेटि इति सिपि आर्धधातुकसंज्ञक:। सिबभावे सार्वधातुकसंज्ञक:।

---

## आर्धधातुके प्रत्यये पञ्चोपाङ्गानि

आर्धधातुकप्रत्यये परत: १.प्रत्ययादेश: २.धात्वादेश: ३.अतिदेश, ४.इडागम ५.द्वित्वाभ्यासकार्यम्, इति पञ्चोपाङ्गानि भवन्ति। यत इडागमस्य सम्बन्ध आर्धधातुकेन भवति, अत: सार्वधातुकखण्डे नोक्त:।

## १. प्रथममुपाङ्गम्-प्रत्ययादेश:

**आर्धधातुकं शेष:** –सार्वधातुकप्रत्यया उक्ता:। सार्वधातुकभिन्ना: सर्वे प्रत्यया आर्धधातुकसंज्ञा भवन्ति। अतो लिट्, लुट् लृट्, आशीर्लिङ्, लुङ्, लृङ् लकाराणां प्रत्यया:, शिद्भिन्नाश्च सर्वे प्रत्यया धातोर्विहिता, आर्धधातुकसंज्ञा भवन्ति। अत्रादेशेन आगमेन च निष्पन्ना आर्धधातुकप्रत्यया उच्यन्ते -

### १. तिङ्-आर्धधातुकप्रत्यया

### लुट्-लकारस्य प्रत्यया:

अत्र आदौ तास् प्रत्ययोऽस्ति आर्धधातुकसंज्ञक:। अत इमे प्रत्यया आर्धधातुकसंज्ञका:।

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र.पु. | ता | तारौ | तार: | ता | तारौ | तार: |
| म.पु. | तासि | तास्थ: | तास्थ | तासे | तासाथे | ताध्वे |
| उ.पु. | तास्मि | तास्व: | तास्म: | ताहे | तास्वहे | तास्महे |

**ऌट्-लकारस्य प्रत्यया:**

अत्र आदौ स्य-प्रत्ययोऽस्ति आर्धधातुकसंज्ञक: । अत इमे प्रत्यया आर्धधातुकसंज्ञका: ।

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | स्यति | स्यत: | स्यन्ति | स्यते | स्येते | स्यन्ते |
| म. पु. | स्यसि | स्यथ: | स्यथ | स्यसे | स्येथे | स्यध्वे |
| उ. पु. | स्यामि | स्याव: | स्याम: | स्ये | स्यावहे | स्यामहे |

**ऌङ्-लकारस्य प्रत्यया:**

अत्र आदौ स्य-प्रत्ययोऽस्ति आर्धधातुकसंज्ञक: । अत इमे प्रत्यया आर्धधातुकसंज्ञका: ।

| | | | | | | |
|---|---|---|---|---|---|---|
| प्र. पु. | स्यत् | स्यताम् | स्यन् | स्यत | स्येताम् | स्यन्त |
| म. पु. | स्य: | स्यतम्: | स्यत | स्यथा: | स्येथाम् | स्यध्वम् |
| उ. पु. | स्यम् | स्याव | स्याम | स्ये | स्यावहि | स्यामहि |

अन्ये आर्धधातुकप्रत्यया: प्रक्रियावसरे वक्ष्यन्ते ।

# २. द्वितीयमुपाङ्गम्-आर्धधातुके धात्वादेश:

**धात्वादेशा:** - प्रत्यये परतो धातो: स्थाने विधीयमाना आदेशा धात्वादेशा इत्युच्यन्ते। आर्धधातुकेषु प्रत्ययेषु परत इमे धात्वादेशा अष्टाध्याय्या द्वितीयाध्याये चतुर्थपादे २.४.३५-२.४.५७ इति यावदुक्ता: अथ च ६.१.४५-५७, इत्यत्रापि । अन्यत्रापि सन्ति, ते संकलय्योच्यन्ते-सार्वधातुकेषु प्रत्ययेषु इमे धात्वादेशा: ७.३.७१-८१ इति यावदुक्ता: । एतदधीत्यैवाङ्गकार्यस्य निर्णयो भवेदिति ।

**अस्तेर्भू:(२.४.५२)** - अस्तेर्धातोर्भूरयमादेशो भवत्यार्धधातुके । भविता । भवितुम् । भवितव्यम् ।

**ब्रुवो वचि: (२.४.५३)** - आर्धधातुके ब्रुवो वचिरादेशो भवति । वक्ता । वक्तुम् । वक्तव्यम् ।

**चक्षिङ: ख्याञ् (२.४.५४)** - चक्षिङ: ख्याञादेशो भवत्यार्धधातुके । ख्याता । ख्यातुम् ।

**अजेर्व्यघञपो: (२.४.५६)** - अजेर्वी इत्ययमादेश: स्यादार्धधातुकविषये घञ् अपं च वर्जयित्वा । विवाय, विव्यतु:, विव्यु: ।

**आदेच उपदेशेऽशिति (६.१.४५)** - उपदेश एजन्तस्य धातोरात्वं स्यान्न तु शिति । ध्यै + स्यति = ध्यास्यति । ग्लै + स्यति = ग्लास्यति

**भ्रस्जो रोपधयो रमन्यतरस्याम् (६.४.४७)** - भ्रस्जो रेफस्योपधायाश्च स्थाने रमादेशो वा स्यादार्धधातुके । बभर्ज, बभ्रज्ज । भ्रर्ष्टा, भ्रष्टा ।

**अतो लोप:(६.४.४८)** - आर्धधातुकोपदेशकाले यदकारान्तं तस्याकारस्य लोप: स्यादार्धधातुके परे । चिकीर्षिता । चिकीर्षितुम् । चिकीर्षितव्यम् ।

**यस्य हलः(६.४.४९)** – हलः परस्य यशब्दस्य लोपः स्यादार्धधातुके। बेभिदिता। बेभिदितुम्। बेभिदितव्यम्।

**क्यस्य विभाषा (६.४.५०)** – हलः परयोः क्यच्क्यङोर्लोपो वा स्यादार्धधातुके। समिधिता, समिध्यिता।

**मीनाति-मिनोतिदीङां ल्यपि च (६.१.५०)** – मीञ् हिंसायाम्, डुमिञ् प्रक्षेपणे, दीङ् क्षये, एषां आत्वं स्याल्ल्यपि, चकारादेचश्च विषये। प्रमाता। प्रमातुम्। प्रमातव्यम्। प्रमाय। उपदाता। उपदातुम्। उपदातव्यम्। उपदाय।

**विभाषा लीयतेः(६.१.५१)** – लीङ् श्लेषणे, ली श्लेषणे, अनयोर्विभाषा आत्वं स्याल्ल्यपि, चकाराद् एचश्च विषये। विलाता। विलातुम्। विलातव्यम्। विलाय। विलेता। विलेतुम्। विलेतव्यम्। विलीय।

**इमे सामान्यधात्वादेशा उक्ताः। विशेषधात्वादेशाः तत्तत्प्रत्ययप्रसङ्गे वक्ष्यन्ते।**

---

# ३. तृतीयमुपाङ्गम्-आर्धधातुकेऽतिदेशः

**अतिदेशः** – अतस्मिंस्तद्धर्मारोपोऽतिदेशो भवति। यो धर्मो यत्र न भवति, स धर्मः क्वचित् तत्रारोप्यते। यथा – क्त्वाप्रत्ययः किद् अस्ति, किन्तु इडागमे सति स क्त्वाप्रत्ययः 'न क्त्वा सेट्' इति सूत्रेण अकिद् भवति। तेन देवित्वा इत्यत्र गुणो भवति। सिच्प्रत्ययः अकिद् अस्ति, किन्तु 'लिङ्सिचावात्मनेपदेषु' इति सूत्रेण किद् भवति। तेन असिक्त इत्यत्र गुणो न भवति। अतः अङ्गकार्यात् प्राग् अतिदेशस्य ज्ञानमावश्यकं भवति। अष्टाध्याय्यां १.२.१ इत्यत आरभ्य १.२.२६ इत्यन्तमतिदेशप्रकरणं वर्तते। तच्चात्र व्याख्यायते।

## आर्धधातुकेषु प्रत्ययेषु सामान्यातिदेशाः

**गाङ्कुटादिभ्योऽञ्णिन्ङित् (१.२.१)** – गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः भवन्ति। इङादेशो गाङ् अत्र गृह्यते। अधि + गा + सीष्ट = अध्यगीष्ट। अत्र घुमास्था० इति ईत्वं भवति।

कुटादय उच्यन्ते। अत्र ङित्त्वाद् गुणो न भवति।

| | | | | | | |
|---|---|---|---|---|---|---|
| गु पुरीषोत्सर्गे | - | गुता | गुतुम् | गुतव्यम् | गुष्यति | अगुष्यत् |
| ध्रु गतिस्थैर्ययोः | - | ध्रुता | ध्रुतुम् | ध्रुतव्यम् | ध्रुष्यति | अध्रुष्यत् |
| कुङ् शब्दे | - | कुता | कुतुम् | कुतव्यम् | कुष्यति | अकुष्यत |
| णू स्तवने | - | नुविता | नुवितुम् | नुवितव्यम् | नुविष्यति | अनुविष्यत् |
| धू विधूनने | - | धुविता | धुवितुम् | धुवितव्यम् | धुविष्यति | अधुविष्यत् |
| डिप क्षेपे | - | डिपिता | डिपितुम् | डिपितव्यम् | डिपिष्यति | अडिपिष्यत् |
| कुच सङ्कोचने | - | कुचिता | कुचितुम् | कुचितव्यम् | कुचिष्यति | अकुचिष्यत् |

| | | | | | | |
|---|---|---|---|---|---|---|
| गुज शब्दे | - | गुजिता | गुजितुम् | गुजितव्यम् | गुजिष्यति | अगुजिष्यत् |
| कुट कौटिल्ये | - | कुटिता | कुटितुम् | कुटितव्यम् | कुटिष्यति | अकुटिष्यत् |
| पुट संश्लेषणे | - | पुटिता | पुटितुम् | पुटितव्यम् | पुटिष्यति | अपुटिष्यत् |
| स्फुट विकसने | - | स्फुटिता | स्फुटितुम् | स्फुटितव्यम् | स्फुटिष्यति | अस्फुटिष्यत् |
| मुट आक्षेपमर्दनयोः | - | मुटिता | मुटितुम् | मुटितव्यम् | मुटिष्यति | अमुटिष्यत् |
| त्रुट छेदने | - | त्रुटिता | त्रुटितुम् | त्रुटितव्यम् | त्रुटिष्यति | अत्रुटिष्यत् |
| तुट कलहकर्मणि | - | तुटिता | तुटितुम् | तुटितव्यम् | तुटिष्यति | अतुटिष्यत् |
| चुट छेदने | - | चुटिता | चुटितुम् | चुटितव्यम् | चुटिष्यति | अचुटिष्यत् |
| छुट छेदने | - | छुटिता | छुटितुम् | छुटितव्यम् | छुटिष्यति | अच्छुटिष्यत् |
| जुट बन्धने | - | जुटिता | जुटितुम् | जुटितव्यम् | जुटिष्यति | अजुटिष्यत् |
| लुट संश्लेषणे | - | लुटिता | लुटितुम् | लुटितव्यम् | लुटिष्यति | अलुटिष्यत् |
| घुट प्रतिघाते | - | घुटिता | घुटितुम् | घुटितव्यम् | घुटिष्यति | अघुटिष्यत् |
| गुड रक्षायाम् | - | गुडिता | गुडितुम् | गुडितव्यम् | गुडिष्यति | अगुडिष्यत् |
| कुड बाल्ये | - | कुडिता | कुडितुम् | कुडितव्यम् | कुडिष्यति | अकुडिष्यत् |
| पुड उत्सर्गे | - | पुडिता | पुडितुम् | पुडितव्यम् | पुडिष्यति | अपुडिष्यत् |
| तुड तोडने | - | तुडिता | तुडितुम् | तुडितव्यम् | तुडिष्यति | अतुडिष्यत् |
| थुड संवरणे | - | थुडिता | थुडितुम् | थुडितव्यम् | थुडिष्यति | अथुडिष्यत् |
| स्थुड संवरणे | - | स्थुडिता | स्थुडितुम् | स्थुडितव्यम् | स्थुडिष्यति | अस्थुडिष्यत् |
| स्फुड संवरणे | - | स्फुडिता | स्फुडितुम् | स्फुडितव्यम् | स्फुडिष्यति | अस्फुडिष्यत् |
| चुड सम्वरणे | - | चुडिता | चुडितुम् | चुडितव्यम् | चुडिष्यति | अचुडिष्यत् |
| व्रुड सम्वरणे | - | व्रुडिता | व्रुडितुम् | व्रुडितव्यम् | व्रुडिष्यति | अव्रुडिष्यत् |
| क्रुड निमज्जने | - | क्रुडिता | क्रुडितुम् | क्रुडितव्यम् | क्रुडिष्यति | अक्रुडिष्यत् |
| भड निमज्जने | - | भडिता | भडितुम् | भडितव्यम् | भडिष्यति | अभडिष्यत् |
| कृड घनत्वे | - | कृडिता | कृडितुम् | कृडितव्यम् | कृडिष्यति | अकृडिष्यत् |
| छुर छेदने | - | छुरिता | छुरितुम् | छुरितव्यम् | छुरिष्यति | अच्छुरिष्यत् |
| गुरी उद्यमने | - | गुरिता | गुरितुम् | गुरितव्यम् | गुरिष्यति | अगुरिष्यत् |
| स्फुर सञ्चलने | - | स्फुरिता | स्फुरितुम् | स्फुरितव्यम् | स्फुरिष्यति | अस्फुरिष्यत् |

स्फुल सञ्चलने - स्फुलिता स्फुलितुम् स्फुलितव्यम् स्फुलिष्यति अस्फुलिष्यत्

**विज इट्** (१.२.२) - विजेः पर इडादिः प्रत्ययो ङिद्वद् भवति। उद् + विज् + इता = उद्विजिता।

**विभाषोर्णोः** (१.२.३) -ऊर्णोः परः इडादिप्रत्ययो वा ङिद्वद् भवति। ङित्त्वाद् उकारस्य स्थाने उवङ् भवति। ऊर्णु + इता = ऊर्णुविता। ङित्त्वाभावे गुणो भवति। ऊर्णविता।

**अयं सामान्यातिदेश उक्तः। विशेषातिदेशाः तत्तत्प्रत्ययप्रसङ्गे वक्ष्यन्ते।**

# ४. चतुर्थमुपाङ्गम्-इडागमः

धातोः आर्धधातुकेषु प्रत्ययेषु परत इडागमस्य विचारः क्रियते। कदायमिडागमो भवति, कदा न भवति। कस्यार्धधातुकप्रत्ययस्य भवतीयमिडागमः कस्य न भवतीत्युच्यते -

१. **आर्धधातुकस्येड् वलादेः** (७.२.३५) - वलादेरार्धधातुकस्येडागमो भवति।

२. **नेड् वशि कृति** (७.२.८) - वशादेः कृत इडागमो न भवति।

३. **वस्वेकाजाद्घसाम्** (७.२.६७) -क्वसु-प्रत्ययोऽपि वशादिः कृत्। किन्त्वस्येडागमो भवति।

३. **तितुत्रतथसिसुसरकसेषु च** (७.२.९) - ति, तु, त्र, त, थ, सि, सु, सर, क, स, इत्येतेषां दशानां वलाद्यार्धधातुकप्रत्ययानामिडागमो न भवति।

इत्थञ्च **क्त, क्तवतु, क्त्वा, तुमुन्, तव्य, तव्यत्, तृच्, तृन्, तास्, तवै, तवेन्, तोसुन्, त्वन्, तवेङ् इत्येते** चतुर्दश तकारादयः, **सिच्, सीयुट्, सन्, स्य, क्से, से, सेन्, सिप् इत्येते** अष्टौ सकारादयः **'वस्वेकाजाद्घसाम्'** इत्यनेन **एकः क्वसुः, अथ च** लिट्लकारस्य **थल्, व, म, से, ध्वे, वहे, महे,** एते सप्त, इत्याहत्य त्रिंशद् वलाद्यार्धधातुकप्रत्यया एवेडागमभाजः सन्ति।

अतोऽन्ये सर्वे आर्धधातुकप्रत्यया अनिट इति विज्ञेयम्।

## सेड्-अनिड्-धातवः

यथा प्रत्यया भवन्ति सेटः, अनिटश्च, तथैव धातवोऽपि भवन्ति सेटः, अनिटश्च। यदा एते त्रिंशत् सेट्प्रत्ययाः सेड्भ्यो धातुभ्यो विधीयन्ते तदैवेडागमो भवति, नान्यथा।

यथा - 'पठितः' 'पठितवान्' इत्यत्र वलादेरार्धधातुकस्य निष्ठाप्रत्ययस्य इडागमो भवति, किन्तु 'कृतः' 'कृतवान्' इत्यत्र तस्यैव वलादेरार्धधातुकस्य निष्ठाप्रत्ययस्य इडागमो न भवति। अत्र को हेतुः ?

'पठितः' 'पठितवान्' इत्यत्र 'आर्धधातुकस्येड् वलादेः' इत्यनेन प्रत्ययस्य वलादित्वमार्धधातुकत्वं चाश्रित्य निष्ठाप्रत्ययस्येडागमो भवति, किन्तु 'कृतः' 'कृतवान्' इत्यत्र 'एकाच उपदेशेऽनुदात्तात्' इत्यनेन धातोरनिट्त्वमाश्रित्य निष्ठाप्रत्ययस्येडागमो न भवति। येषां प्रत्ययानामिडागमो भवति ते सेट्प्रत्ययाः सन्ति,

अन्येऽनिटः। येभ्यो धातुभ्यो विहितानां सेट्प्रत्ययानामिडागमो भवति ते सेट्धातवः सन्ति, अन्येऽनिटः।

यदा सेड्भ्यो धातुभ्यः सेट्प्रत्यया विधीयन्ते तदैव ते इडागमभाजो भवन्ति नान्यथा। अतः 'पठितः' 'पठितवान्' इत्यत्र प्रत्ययस्य सेट्त्वमाश्रित्येडागमो भवति, किन्तु 'कृतः' 'कृतवान्' इत्यत्र धातोरनिट्त्वमाश्रित्येडागमो न भवति। **अत इडागमो यथा प्रत्ययं आश्रयति तथैव प्रकृतिमप्याश्रयतीति विज्ञेयम्। अतो धातुं प्रत्ययं चोभयं विचार्यैवेडागमो विधातव्यः।**

## धातूनां सेट्त्वमनिट्त्वं वा कथं विज्ञेयम् ?

**एकाच उपदेशेऽनुदात्तात्** (७.२.१०) - उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येट् न भवति। अतो भवतु नाम प्रत्यये वलादित्वमार्धधातुकत्वं च, किन्तूपदेशावस्थायां धातोरेकाच्त्वे अथ चानुदात्तत्वे सति, तेभ्यो विहितानां त्रिंशत्सेट्प्रत्ययानामपीडागमोऽनेन सूत्रेण निषिध्यते। यथा - कृतः, कृतवान्, कृत्वा, कर्तुम्, कर्तव्यमिति।

पाणिनीयधातुपाठे जागृ, ऊर्णु, दरिद्रा, चकासृ, चिरि, जिरि, दीधीङ्, वेवीङ्, इत्येते धातवोऽनेकाचः, अतोऽन्ये सर्वे एकाच एव। धातोरेकाच्त्वं तु दृष्ट्वैवावगम्यते किन्तु तस्यानुदात्तत्वमवगन्तुं न शक्यत, इत्यनुदात्ता अनिटो धातवः परिगण्यन्ते। धातूनां सेडनिड्विभागः धातूनामन्त्याक्षरक्रमेण तास्-प्रत्ययान्तेन प्रदर्श्यते।

**अत्रायं विशेषः -**

यत् प्रथमं रूपं वर्तते तास्प्रत्ययस्य, तद् लुट्लकारस्य रूपमस्ति। इदमेव रूपं भवति तृन्तृचोः। अनेन च सदृशानि रूपाणि भवन्ति तुमुन्-तव्य-तव्यत्-प्रत्ययानाम्। अतस्त्रिभी रूपैः पञ्च प्रत्ययाः सिध्यन्ति। यद् रूपं वर्तते स्यप्रत्ययस्य, तद् लृट्लकारस्य रूपमस्ति। अनेनैव सदृशं रूपं भवति लृङ्लकारस्य, अतस्तदपि लिख्यते। अत इडागमेन सह त्रयो लकाराः सिध्यन्ति, पञ्च कृदन्ताश्च।

## अनिडजन्तधातवः

१. **एकाच आकारान्तधातवः** - सर्वे एकाच आकारान्ता धातवोऽनिटः सन्ति।

| | | तास्-तृच्-तृन् | तुमुन् | तव्य-तव्यत् | स्य (लृट्) | स्य (लृङ्) |
|---|---|---|---|---|---|---|
| पा | - | पाता | पातुम् | पातव्यम् | पास्यति | अपास्यत् |

२. **एकाच इकारान्तधातवः** - अत्र श्वि, श्रि, इति द्वौ सेटौ।

| | | | | | | |
|---|---|---|---|---|---|---|
| श्रि | - | श्रयिता | श्रयितुम् | श्रयितव्यम् | श्रयिष्यति | अश्रयिष्यत् |
| श्वि | - | श्वयिता | श्वयितुम् | श्वयितव्यम् | श्वयिष्यति | अश्वयिष्यत् |

एतद्धातुद्वयं विहायान्ये सर्वे एकाच इकारान्तधातवोऽनिटः सन्ति। यथा -

| | | | | | | |
|---|---|---|---|---|---|---|
| जि | - | जेता | जेतुम् | जेतव्यम् | जेष्यति | अजेष्यत् |

**३. एकाच ईकारान्तधातवः** - अत्र शीङ्, डीङ् इति द्वौ सेटौ।

| | | | | | | |
|---|---|---|---|---|---|---|
| शी | - | शयिता | शयितुम् | शयितव्यम् | शयिष्यते | अशयिष्यत |
| डी | - | डयिता | डयितुम् | डयितव्यम् | डयिष्यते | अडयिष्यत |

एतद्धातुद्वयं विहायान्ये सर्वे एकाच ईकारान्तधातवोऽनिटः सन्ति। यथा -

| | | | | | | |
|---|---|---|---|---|---|---|
| नी | - | नेता | नेतुम् | नेतव्यम् | नेष्यति | अनेष्यत् |

**४. एकाच उकारान्तधातवः** - अत्र यु, रु, नु, स्नु, क्षु, क्ष्णु इति षड् धातवः सेटः।

| | | | | | | |
|---|---|---|---|---|---|---|
| यु | - | यविता | यवितुम् | यवितव्यम् | यविष्यति | अयविष्यत् |
| रु | - | रविता | रवितुम् | रवितव्यम् | रविष्यति | अरविष्यत् |
| नु | - | नविता | नवितुम् | नवितव्यम् | नविष्यति | अनविष्यत् |
| स्नु | - | स्नविता | स्नवितुम् | स्नवितव्यम् | स्नविष्यति | अस्नविष्यत् |
| क्षु | - | क्षविता | क्षवितुम् | क्षवितव्यम् | क्षविष्यति | अक्षविष्यत् |
| क्ष्णु | - | क्ष्णविता | क्ष्णवितुम् | क्ष्णवितव्यम् | क्ष्णविष्यति | अक्ष्णविष्यत् |

एतद्धातुषट्कं विहाय सर्वे एकाच उकारान्तधातवोऽनिटः सन्ति।

| | | | | | | |
|---|---|---|---|---|---|---|
| हु | - | होता | होतुम् | होतव्यम् | होष्यति | अहोष्यत् |

**५. एकाच ऊकारान्तधातवः** - सर्वे ऊकारान्तधातवः सेटः सन्ति। यथा -

| | | | | | | |
|---|---|---|---|---|---|---|
| भू | - | भविता | भवितुम् | भवितव्यम् | भविष्यति | अभविष्यत् |

**६. एकाच ऋकारान्तधातवः** - अत्र वृङ्, वृञ् इति द्वौ सेटौ।

| | | | | | | |
|---|---|---|---|---|---|---|
| वृञ् | - | वरिता | वरितुम् | वरितव्यम् | वरिष्यति | अवरिष्यत् |
| वृङ् | - | वरिता | वरितुम् | वरितव्यम् | वरिष्यति | अवरिष्यत् |

एतद्धातुद्वयं विहाय सर्वे एकाच ऋकारान्तधातवोऽनिटः सन्ति। यथा -

| | | | | | | |
|---|---|---|---|---|---|---|
| कृ | - | कर्ता | कर्तुम् | कर्तव्यम् | करिष्यति | अकरिष्यत् |

**अत्र विशेषः -**

**ऋद्धनोः स्ये (७.२.७०) - ऋकारान्ता धातवो, हन्धातुश्च स्यप्रत्यये सेटो भवन्ति।**

**७. एकाच ॠकारान्तधातवः** - सर्वे ॠकारान्तधातवः सेटः सन्ति। यथा -

| | | | | | | |
|---|---|---|---|---|---|---|
| तॄ | - | तरिता | तरितुम् | तरितव्यम् | तरिष्यति | अतरिष्यत् |

**८. एकाच एजन्तधातवः** - सर्वे एकाच एजन्तधातवोऽनिटः सन्ति।

| | | | | | | |
|---|---|---|---|---|---|---|
| ध्यै | - | ध्याता | ध्यातुम् | ध्यातव्यम् | ध्यास्यति | अध्यास्यत् |

**अत्र ध्यातव्यम् -** एजन्तधातवः शिद्भिन्नेष्वार्धधातुकेषु प्रत्ययेषु **'आदेच उपदेशेऽशिति'** इत्यनेन सूत्रेण आकारान्ताः सम्पद्यन्ते।

# अनिड् हलन्तधातवः

### ककारान्ताः

१. **एकाचः ककारान्तधातवः -** कान्तेषु 'शक्लृ शक्तौ (प)' इत्येको धातुरनिडस्ति।

| | | | | | | |
|---|---|---|---|---|---|---|
| शक् | - | शक्ता | शक्तुम् | शक्तव्यम् | शक्ष्यति | अशक्ष्यत् |

अतोऽन्ये सर्वे ककारान्तधातवः सेटः।

### चकारान्ताः

२. **एकाचश्चकारान्तधातवः -** चान्तेषु पच्, वच् (प. वच परिभाषणे अदादिः, चौरादिको युजादिः, ब्रुवो वचिश्च), रिच् (उ.) (रिचिर् विरेके, रिच वियोजनसंपर्चनयोः), विच् (विचिर् पृथग्भावे), सिच्, (उ) मुच्लृ (उ.), इति षड् धातवोऽनिटः सन्ति।

| | | | | | | |
|---|---|---|---|---|---|---|
| पच् | - | पक्ता | पक्तुम् | पक्तव्यम् | पक्ष्यति | अपक्ष्यत् |
| मुच्-मोच् | - | मोक्ता | मोक्तुम् | मोक्तव्यम् | मोक्ष्यति | अमोक्ष्यत् |
| रिच्-रेच् | - | रेक्ता | रेक्तुम् | रेक्तव्यम् | रेक्ष्यति | अरेक्ष्यत् |
| वच् | - | वक्ता | वक्तुम् | वक्तव्यम् | वक्ष्यति | अवक्ष्यत् |
| विच्-वेच् | - | वेक्ता | वेक्तुम् | वेक्तव्यम् | वेक्ष्यति | अवेक्ष्यत् |
| सिच्-सेच् | - | सेक्ता | सेक्तुम् | सेक्तव्यम् | सेक्ष्यति | असेक्ष्यत् |

अतोऽन्ये चकारान्तधातवः सेटः।

### छकारान्ताः

३. **एकाचश्छकारान्तधातवः -** छान्तेषु प्रच्छेकः। छकारान्तेषु प्रच्छ् (प), इत्येको धातुरनिडस्ति।

| | | | | | | |
|---|---|---|---|---|---|---|
| प्रच्छ् | - | प्रष्टा | प्रष्टुम् | प्रष्टव्यम् | प्रक्ष्यति | अप्रक्ष्यत् |

अतोऽन्ये छकारान्तधातवः सेटः।

### जकारान्ताः

४. **एकाचो जकारान्तधातवः -** जान्तेषु त्यज् (प.), भज् (उ.), यज् (उ.), निजिर्, विजिर् (उ) (रुधादेः), भुज् (उ.) (भुज पालनाभ्यवहारयोः, भुजो कौटिल्ये), युज् (उ.) (युजिर् योगे, युज समाधौ), रुज् (प.), सृज् (आ. दिवादेः) सृज् (प.तुदादेश्च), भञ्ज् (प), रञ्ज् (उ.), सञ्ज् (प.), स्वञ्ज् (आ.),

भ्रस्ज् (उ.), मस्ज् (प.), इति पञ्चदश धातवोऽनिटः सन्ति।

| | | | | | | |
|---|---|---|---|---|---|---|
| त्यज् | - | त्यक्ता | त्यक्तुम् | त्यक्तव्यम् | त्यक्ष्यति | अत्यक्ष्यत् |
| भज् | - | भक्ता | भक्तुम् | भक्तव्यम् | भक्ष्यति | अभक्ष्यत् |
| यज् | - | यष्टा | यष्टुम् | यष्टव्यम् | यक्ष्यति | अयक्ष्यत् |
| निज्-नेज् | - | नेक्ता | नेक्तुम् | नेक्तव्यम् | नेक्ष्यति | अनेक्ष्यत् |
| विज्-वेज् | - | वेक्ता | वेक्तुम् | वेक्तव्यम् | वेक्ष्यति | अवेक्ष्यत् |
| भुज्-भोज् | - | भोक्ता | भोक्तुम् | भोक्तव्यम् | भोक्ष्यति | अभोक्ष्यत् |
| | | | | | भोक्ष्यते | अभोक्ष्यत |
| युज्-योज् | - | योक्ता | योक्तुम् | योक्तव्यम् | योक्ष्यति | अयोक्ष्यत् |
| | | | | | योक्ष्यते | अयोक्ष्यत |
| रुज्-रोज् | - | रोक्ता | रोक्तुम् | रोक्तव्यम् | रोक्ष्यति | अरोक्ष्यत् |
| सृज्-स्रज् | - | स्रष्टा | स्रष्टुम् | स्रष्टव्यम् | स्रक्ष्यति | अस्रक्ष्यत् |
| भञ्ज् | - | भङ्क्ता | भङ्क्तुम् | भङ्क्तव्यम् | भङ्क्ष्यति | अभङ्क्ष्यत् |
| रञ्ज् | - | रङ्क्ता | रङ्क्तुम् | रङ्क्तव्यम् | रङ्क्ष्यति | अरङ्क्ष्यत् |
| | | | | | रङ्क्ष्यते | अरङ्क्ष्यत |
| सञ्ज् | - | सङ्क्ता | सङ्क्तुम् | सङ्क्तव्यम् | सङ्क्ष्यति | असङ्क्ष्यत् |
| स्वञ्ज् | - | स्वङ्क्ता | स्वङ्क्तुम् | स्वङ्क्तव्यम् | स्वङ्क्ष्यते | अस्वङ्क्ष्यत |
| मस्ज्-मंज् | - | मङ्क्ता | मङ्क्तुम् | मङ्क्तव्यम् | मङ्क्ष्यति | अमङ्क्ष्यत् |
| भ्रस्ज्-भ्रज् | - | भ्रष्टा | भ्रष्टुम् | भ्रष्टव्यम् | भ्रक्ष्यति | अभ्रक्ष्यत् |
| | | | | | भ्रक्ष्यते | अभ्रक्ष्यत |
| भ्रस्ज्-भर्ज् | - | भर्ष्टा | भर्ष्टुम् | भर्ष्टव्यम् | भर्क्ष्यति | अभर्क्ष्यत् |
| | | | | | भर्क्ष्यति | अभर्क्ष्यत |

अतोऽन्ये जकारान्ताः सेटः।

**दकारान्ताः**

**५. एकाचो दकारान्तधातवः -** दान्तेषु अद् (प.), पद् (आ.) (दिवादिः), शद्लृ (शित्सु आ. अन्यत्र प.), षद्लृ (प.), हद् (आ.), खिद् (दिवादिः (आ.), तुदादिः (प.), रुधादिः (आ.), छिदिर्, भिदिर्, (उ) विद् (विद सत्तायाम्, दिवादिः (आ.), विद् (विद विचारणे, रुधादिः (आ.), स्विद् (प), क्षुदिर् (उ),

तुद्, नुद् (उ.), स्कन्दिर् (प.), इति पञ्चदश धातवोऽनिटः।

| | | | | | | |
|---|---|---|---|---|---|---|
| अद् | - | अत्ता | अत्तुम् | अत्तव्यम् | अत्स्यति | आत्स्यत् |
| पद् | - | पत्ता | पत्तुम् | पत्तव्यम् | पत्स्यते | अपत्स्यत |
| शद् | - | शत्ता | शत्तुम् | शत्तव्यम् | शत्स्यति | अशत्स्यत् |
| सद् | - | सत्ता | सत्तुम् | सत्तव्यम् | सत्स्यति | असत्स्यत् |
| हद् | - | हत्ता | हत्तुम् | हत्तव्यम् | हत्स्यते | अहत्स्यत |
| खिद्-खेद् | - | खेत्ता | खेत्तुम् | खेत्तव्यम् | खेत्स्यति | अखेत्स्यत् |
| | | | | | खेत्स्यते | अखेत्स्यत |
| छिद्-छेद् | | छेत्ता | छेत्तुम् | छेत्तव्यम् | छेत्स्यति | अच्छेत्स्यत् |
| | | | | | छेत्स्यते | अच्छेत्स्यत |
| भिद्-भेद् | | भेत्ता | भेत्तुम् | भेत्तव्यम् | भेत्स्यति | अभेत्स्यत् |
| | | | | | भेत्स्यते | अभेत्स्यत |
| विद्-वेद् | | वेत्ता | वेत्तुम् | वेत्तव्यम् | वेत्स्यति | अवेत्स्यत् |
| | | | | | वेत्स्यते | अवेत्स्यत |
| विद्-वेद् | | वेत्ता | वेत्तुम् | वेत्तव्यम् | वेत्स्यति | अवेत्स्यत् |
| | | | | | वेत्स्यते | अवेत्स्यत |
| स्विद्-स्वेद् | | स्वेत्ता | स्वेत्तुम् | स्वेत्तव्यम् | स्वेत्स्यति | अस्वेत्स्यत् |
| | | | | | स्वेत्स्यते | अच्छेत्स्यत |
| क्षुद्-क्षोद् | | क्षोत्ता | क्षोत्तुम् | क्षोत्तव्यम् | क्षोत्स्यति | अक्षोत्स्यत् |
| | | | | | क्षोत्स्यते | अक्षोत्स्यत |
| तुद्-तोद् | | तोत्ता | तोत्तुम् | तोत्तव्यम् | तोत्स्यति | अतोत्स्यत् |
| | | | | | तोत्स्यते | अतोत्स्यत |
| नुद्-नोद् | | नोत्ता | नोत्तुम् | नोत्तव्यम् | नोत्स्यति | अनोत्स्यत् |
| | | | | | नोत्स्यते | अनोत्स्यत |
| स्कन्द् | | स्कन्ता | स्कन्तुम् | स्कन्तव्यम् | स्कन्त्स्यति | अस्कन्त्स्यत् |

अतोऽन्ये दकारान्तधातवः सेटः।

**ध्यातव्यम्** -दिवादिगणस्य 'विद सत्तायाम्', रुधादिगणस्य 'विद विचारणे', इत्येतावनिटौ - वेत्ता। तुदादिगणस्य 'विद्लृ लाभे', अदादिगणस्य च 'विद ज्ञाने', इति सेटौ - वेदिता।

**धकारान्ताः**

६. **एकाचो धकारान्तधातवः** - धान्तेषु व्यध् (प.), सिध् (षिधु संराद्धौ, दिवादेः), क्रुध्, क्षुध्, (प) बुध्, युध्, (आ) रुध्, (रुधिर् आवरणे (उ), अनो रुध कामे (उ) शुध्, राध्, साध्, बन्ध् (प), इति एकादश धकारान्तधातवोऽनिटः।

| | | | | | | |
|---|---|---|---|---|---|---|
| व्यध् | - | व्यद्धा | व्यद्धुम् | व्यद्धव्यम् | व्यत्स्यति | अव्यत्स्यत् |
| सिध्-सेध् | - | सेद्धा | सेद्धुम् | सेद्धव्यम् | सेत्स्यति | असेत्स्यत् |
| क्रुध्-क्रोध् | - | क्रोद्धा | क्रोद्धुम् | क्रोद्धव्यम् | क्रोत्स्यति | अक्रोत्स्यत् |
| क्षुध् | - | क्षोद्धा | क्षोद्धुम् | क्षोद्धव्यम् | क्षोत्स्यति | अक्षोत्स्यत् |
| बुध् | - | बोद्धा | बोद्धुम् | बोद्धव्यम् | भोत्स्यते | अभोत्स्यत |
| युध् | - | योद्धा | योद्धुम् | योद्धव्यम् | योत्स्यते | अयोत्स्यत |
| शुध् | - | शोद्धा | शोद्धुम् | शोद्धव्यम् | शोत्स्यति | अशोत्स्यत् |
| राध् | - | राद्धा | राद्धुम् | राद्धव्यम् | रात्स्यति | अरात्स्यत् |
| साध् | - | साद्धा | साद्धुम् | साद्धव्यम् | सात्स्यति | असात्स्यत् |
| बन्ध् | - | बन्द्धा | बन्द्धुम् | बन्द्धव्यम् | भन्त्स्यति | अभन्त्स्यत् |

अतोऽन्ये धकारान्तधातवः सेटः।

**ध्यातव्यम्** - भ्वादिगणस्य 'बुधिर् बोधने' सेडस्ति - बोधिता। दिवादिगणस्य 'बुध अवगमने' अनिडस्ति - बोद्धा।

**नकारान्ताः**

७. **एकाचो नकारान्तधातवः** - नान्तेषु मन् ( मन ज्ञाने, दिवादेः(आ) हन् (प), इत्येतौ द्वौ धातू अनिटौ स्तः।

| | | | | | | |
|---|---|---|---|---|---|---|
| मन् | - | मन्ता | मन्तुम् | मन्तव्यम् | मंस्यते | अमंस्यत |
| हन् | - | हन्ता | हन्तुम् | हन्तव्यम् | हनिष्यति | अहनिष्यत् |

अत्र विशेषः -

**ऋद्धनोः स्ये (७.२.७०) - ऋकारान्ता धातवो, हन्धातुश्च स्यप्रत्यये सेटो भवन्ति।**

**पकारान्ताः**

८. **एकाचः पकारान्तधातवः** - पान्तेषु तप् (तप संतापे (प.), तप ऐश्वर्ये, तप दाहे (आ), वप्

(उ), शप् (उ), स्वप् (प), क्षिप् (प) (क्षिप प्रेरणे दिवादेः, तुदादेः), तिप् (आ), लिप् (उ.), छुप् (प), लुप्लृ (उ.), तृप् (दिवादेः प.), दृप् (दिवादेः प.), सृप्, आप्, (प) इति त्रयोदश धातवोऽनिटः सन्ति -

| | | | | | | |
|---|---|---|---|---|---|---|
| तप् | - | तप्ता | तप्तुम् | तप्तव्यम् | तप्स्यति | अतप्स्यत् |
| वप् | - | वप्ता | वप्तुम् | वप्तव्यम् | वप्स्यति | अवप्स्यत् |
| शप् | - | शप्ता | शप्तुम् | शप्तव्यम् | शप्स्यति | अशप्स्यत् |
| | | | | | शप्स्यते | अशप्स्यते |
| स्वप् | - | स्वप्ता | स्वप्तुम् | स्वप्तव्यम् | स्वप्स्यति | अस्वप्स्यत् |
| क्षिप् | - | क्षेप्ता | क्षेप्तुम् | क्षेप्तव्यम् | क्षेप्स्यति | अक्षेप्स्यत् |
| तिप् | - | तेप्ता | तेप्तुम् | तेप्तव्यम् | तेप्स्यते | अतेप्स्यत |
| लिप् | - | लेप्ता | लेप्तुम् | लेप्तव्यम् | लेप्स्यति | अलेप्स्यत् |
| | | | | | लेप्स्यते | अलेप्स्यत |
| छुप् | - | छोप्ता | छोप्तुम् | छोप्तव्यम् | छोप्स्यति | अच्छोप्स्यत् |
| लुप् | - | लोप्ता | लोप्तुम् | लोप्तव्यम् | लोप्स्यति | अलोप्स्यत् |
| | | | | | लोप्स्यते | अलोप्स्यत |
| तृप्-तर्प् | - | तर्प्ता | तर्प्तुम् | तर्प्तव्यम् | तर्प्स्यति | अतर्प्स्यत् |
| तृप्-त्रप् | - | त्रप्ता | त्रप्तुम् | त्रप्तव्यम् | त्रप्स्यति | अत्रप्स्यत् |
| दृप्-दर्प् | - | दर्प्ता | दर्प्तुम् | दर्प्तव्यम् | दर्प्स्यति | अदर्प्स्यत् |
| दृप्-द्रप् | - | द्रप्ता | द्रप्तुम् | द्रप्तव्यम् | द्रप्स्यति | अद्रप्स्यत् |
| सृप्-सर्प् | - | सर्प्ता | सर्प्तुम् | सर्प्तव्यम् | सर्प्स्यति | असर्प्स्यत् |
| सृप्-स्रप् | - | स्रप्ता | स्रप्तुम् | स्रप्तव्यम् | स्रप्स्यति | अस्रप्स्यत् |
| आप् | - | आप्ता | आप्तुम् | आप्तव्यम् | आप्स्यति | आप्स्यत् |

अतोऽन्ये पकारान्तधातवः सेटः। **अत्र ध्यातव्यम् -** दिवादिगणस्य तृप्, दृप्, एतौ वेटौ। अत्र 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति अमागमार्थमत्र पठितौ। तर्पिता, त्रप्ता, तर्प्ता।

स्वादिगणस्य तृप प्रीणने, तुदादिगणस्य तृप तृप्तौ, दृप उत्क्लेशे, एते सेटः - तर्पिता। दर्पिता।

**भकारान्ताः**

**१. एकाचो भकारान्तधातवः -** भान्तेषु यभ् (प), रभ्, लभ् (आ), इति त्रयो धातवोऽनिटः।

यभ् + ता = यब्धा। रभ् + ता = रब्धा। लभ् + ता = लब्धा।

| | | | | | | |
|---|---|---|---|---|---|---|
| यभ् | - | यब्धा | यब्धुम् | यब्धव्यम् | यप्स्यति | अयप्स्यत् |

| | | | | | | |
|---|---|---|---|---|---|---|
| रभ् | - | रब्धा | रब्धुम् | रब्धव्यम् | रप्स्यते | अरप्स्यत |
| लभ् | - | लब्धा | लब्धुम् | लब्धव्यम् | लप्स्यते | अलप्स्यत |

अतोऽन्ये भकारान्तधातव: सेट:।

**मकारान्ता:**

१०. **एकाचो मकारान्तधातव:** - मान्तेषु गम्, नम्, यम्, (प) रम् (आ), इति चत्वारो धातवोऽनिट: सन्ति। गम् + ता = गन्ता। नम् + ता = नन्ता। यम् + ता = यन्ता। रम् + ता = रन्ता।

| | | | | | | |
|---|---|---|---|---|---|---|
| गम् | - | गन्ता | गन्तुम् | गन्तव्यम् | गमिष्यति | अगमिष्यत् |
| नम् | - | नन्ता | नन्तुम् | नन्तव्यम् | नंस्यति | अनंस्यत् |
| यम् | - | यन्ता | यन्तुम् | यन्तव्यम् | यंस्यति | अयंस्यत् |
| रम् | - | रन्ता | रन्तुम् | रन्तव्यम् | रंस्यते | अरंस्यत |

अतोऽन्ये मकारान्तधातव: सेट:।

**अत्र विशेष: -**

**गमेरिट् परस्मैपदेषु (७.२.५८) - गम्धातो: परस्य सकारादे: प्रत्ययस्य इडागमो भवति।**

**शकारान्ता:**

११. **एकाच: शकारान्तधातव:**- शान्तेषु दिश् (उ), रिश्, लिश् (प), ('लिश अल्पीभावे' दिवादे:, 'लिश गतौ' तुदादे:) विश्, रुश्, क्रुश्, दृशिर्, मृश्, स्पृश्, दंश्, (प) इति दश धातवोऽनिट:।

| | | | | | | |
|---|---|---|---|---|---|---|
| दिश् | - | देष्टा | देष्टुम् | देष्टव्यम् | देक्ष्यति | अदेक्ष्यत् |
| | | | | | देक्ष्यते | अदेक्ष्यत |
| रिश् | - | रेष्टा | रेष्टुम् | रेष्टव्यम् | रेक्ष्यति | अरेक्ष्यत् |
| लिश् | - | लेष्टा | लेष्टुम् | लेष्टव्यम् | लेक्ष्यति | अलेक्ष्यत् |
| विश् | - | वेष्टा | वेष्टुम् | वेष्टव्यम् | वेक्ष्यति | अवेक्ष्यत् |
| रुश् | - | रोष्टा | रोष्टुम् | रोष्टव्यम् | रोक्ष्यति | अरोक्ष्यत् |
| क्रुश् | - | क्रोष्टा | क्रोष्टुम् | क्रोष्टव्यम् | क्रोक्ष्यति | अक्रोक्ष्यत् |
| दृश्-द्रष् | - | द्रष्टा | द्रष्टुम् | द्रष्टव्यम् | द्रक्ष्यति | अद्रक्ष्यत् |
| मृश्-मर्श् | - | मर्ष्टा | मर्ष्टुम् | मर्ष्टव्यम् | मर्क्ष्यति | अमर्क्ष्यत् |
| मृश्-म्रश् | - | म्रष्टा | म्रष्टुम् | म्रष्टव्यम् | म्रक्ष्यति | अम्रक्ष्यत् |
| स्पृश्-स्पर्श् | - | स्पर्ष्टा | स्पर्ष्टुम् | स्पर्ष्टव्यम् | स्पर्क्ष्यति | अस्पर्क्ष्यत् |

| | | | | | | |
|---|---|---|---|---|---|---|
| स्पृश्-स्प्रश् | - | स्प्रष्टा | स्प्रष्टुम् | स्प्रष्टव्यम् | स्प्रक्ष्यति | अस्प्रक्ष्यत् |
| दंश् | - | दंष्टा | दंष्टुम् | दंष्टव्यम् | दंक्ष्यति | अदंक्ष्यत् |

अतोऽन्ये शकारान्तधातवः सेटः।

**षकारान्ताः**

१२. **एकाचः षकारान्तधातवः** -षान्तेषु त्विष् (आ), द्विष् (उ), पिष्लृ (प), विष् (उ) (विष्लृ व्याप्तौ जुहोत्यादेः), शिष् (प) (शिष्लृ विशेषणे, रुधादेः), श्लिष् (प) (श्लिष आलिङ्गने, दिवादेः), तुष्, दुष्, पुष् (प) (पुष पुष्टौ, दिवादेः), शुष् (प), कृष् (उ) (भ्वादेः, तुदादेश्च), इति एकादश धातवोऽनिटः।

| | | | | | | |
|---|---|---|---|---|---|---|
| त्विष् | - | त्वेष्टा | त्वेष्टुम् | त्वेष्टव्यम् | त्वेक्ष्यते | अत्वेक्ष्यत |
| द्विष् | - | द्वेष्टा | द्वेष्टुम् | द्वेष्टव्यम् | द्वेक्ष्यति | अद्वेक्ष्यत् |
| | | | | | द्वेक्ष्यते | अद्वेक्ष्यत |
| पिष् | - | पेष्टा | पेष्टुम् | पेष्टव्यम् | पेक्ष्यते | अपेक्ष्यत |
| विष् | - | वेष्टा | वेष्टुम् | वेष्टव्यम् | वेक्ष्यति | अवेक्ष्यत् |
| | | | | | वेक्ष्यते | अवेक्ष्यत |
| शिष् | - | शेष्टा | शेष्टुम् | शेष्टव्यम् | शेक्ष्यते | अशेक्ष्यत |
| श्लिष् | - | श्लेष्टा | श्लेष्टुम् | श्लेष्टव्यम् | श्लेक्ष्यते | अश्लेक्ष्यत |
| तुष् | - | तोष्टा | तोष्टुम् | तोष्टव्यम् | तोक्ष्यते | अतोक्ष्यत |
| दुष् | - | दोष्टा | दोष्टुम् | दोष्टव्यम् | दोक्ष्यते | अदोक्ष्यत |
| पुष् | - | पोष्टा | पोष्टुम् | पोष्टव्यम् | पोक्ष्यते | अपोक्ष्यत |
| शुष् | - | शोष्टा | शोष्टुम् | शोष्टव्यम् | शोक्ष्यते | अशोक्ष्यत |
| कृष्-कर्ष् | - | कर्ष्टा | कर्ष्टुम् | कर्ष्टव्यम् | कर्क्ष्यति | अकर्क्ष्यत् |
| | | | | | कर्क्ष्यते | अकर्क्ष्यत |
| कृष्-क्रष् | - | क्रष्टा | क्रष्टुम् | क्रष्टव्यम् | क्रक्ष्यति | अक्रक्ष्यत् |
| | | | | | क्रक्ष्यते | अक्रक्ष्यत |

अतोऽन्ये षकारान्तधातवः सेटः।

**सकारान्ताः**

१३. **एकाचः सकारान्तधातवः** - एषु वस्, घस्, (प) इति द्वौ धातू अनिटौ स्तः।

| | | | | | | |
|---|---|---|---|---|---|---|
| वस् | - | वस्ता | वस्तुम् | वस्तव्यम् | वत्स्यति | अवत्स्यत् |

| | | | | | | |
|---|---|---|---|---|---|---|
| घस् | - | घस्ता | घस्तुम् | घस्तव्यम् | घत्स्यति | अघत्स्यत् |

अतोऽन्ये सकारान्तधातवः सेटः।

### हकारान्ताः

**१४. एकाचो हकारान्तधातवः** -हान्तेषु दह् (प), दिह्, दुह् (उ) (दुह प्रपूरणे, अदादेः), मिह्, रुह् (प), लिह् (उ), वह् (उ), नह् (प), इति अष्टौ धातवोऽनिटः सन्ति।

| | | | | | | |
|---|---|---|---|---|---|---|
| दह् | - | दग्धा | दग्धुम् | दग्धव्यम् | धक्ष्यति | अधक्ष्यत् |
| दिह् | - | देग्धा | देग्धुम् | देग्धव्यम् | धेक्ष्यति | अधेक्ष्यत् |
| दुह् | - | दोग्धा | दोग्धुम् | दोग्धव्यम् | धोक्ष्यति | अधोक्ष्यत् |
| मिह् | - | मेढा | मेढुम् | मेढव्यम् | मेक्ष्यति | अमेक्ष्यत् |
| रुह् | - | रोढा | रोढुम् | रोढव्यम् | रोक्ष्यति | अरोक्ष्यत् |
| लिह् | - | लेढा | लेढुम् | लेढव्यम् | लेक्ष्यति | अलेक्ष्यत् |
| वह् | - | वोढा | वोढुम् | वोढव्यम् | वक्ष्यति | अवक्ष्यत् |
| नह् | - | नद्धा | नद्धुम् | नद्धव्यम् | नत्स्यति | अनत्स्यत् |

अतोऽन्ये हकारान्तधातवः सेटः।

**ध्यातव्यम् -** एतेभ्योऽनिड्धातुभ्यो यदा सनादिप्रत्यया भवन्ति, तदा एते सनाद्यन्ता धातवोऽनेकाचो सम्पद्यन्ते। अत एते सेटो भवन्ति। यथा गम्+सन्=जिगमिष, गम्+यङ्=जङ्गम्य, एते सनाद्यन्ताः सेटः।

### वेड्-धातवः

**येभ्यो वा भवतीडागमस्ते धातवो वेटः।** इदानीं त्रिभिः सूत्रैर्वेड्धातव उच्यन्ते। एभ्यः परस्य वलादेरार्धधातुकस्येडागमो वा भवति।

**स्वरतिसूतिसूयतिधूञूदितो वा**(७.२.४४)- 'स्वृ शब्दोपतापयोः' 'षूङ् प्राणिगर्भविमोचने' 'षूङ् प्राणिप्रसवे' 'धूञ् कम्पने' अथ च यत्र भवति ऊकारस्येत्संज्ञा, तेभ्यो धातुभ्यः परस्य वलादेरार्धधातुकस्येड् वा भवति। (तुदादिगणस्य धू विधूनने चुरादिगणस्य च धूञ् कम्पने धातू सेटौ)।

**धातुपाठे पठिता ऊदिद्धातवः -**

| | | | | | | |
|---|---|---|---|---|---|---|
| स्वृ | - | स्वर्ता | स्वर्तुम् | स्वर्तव्यम् | स्वर्ष्यति | अस्वर्ष्यत् |
| | - | स्वरिता | स्वरितुम् | स्वरितव्यम् | स्वरिष्यति | अस्वरिष्यत् |
| सू | - | सोता | सोतुम् | सोतव्यम् | सोष्यति | असोष्यत् |
| | - | सविता | सवितुम् | सवितव्यम् | सविष्यते | असविष्यत |

| | | | | | | |
|---|---|---|---|---|---|---|
| सू | - | सोता | सोतुम् | सोतव्यम् | सोष्यति | असोष्यत् |
| | - | सविता | सवितुम् | सवितव्यम् | सविष्यते | असविष्यत |
| धू | - | धोता | धोतुम् | धोतव्यम् | धोष्यति | अधोष्यत् |
| | - | धविता | धवितुम् | धवितव्यम् | धविष्यते | अधविष्यत |

**ऊदितः**

| | | | | | | |
|---|---|---|---|---|---|---|
| तञ्चू | - | तङ्क्ता | तङ्क्तुम् | तङ्क्तव्यम् | तङ्क्ष्यति | अतङ्क्ष्यत् |
| | | तञ्चिता | तञ्चितुम् | तञ्चितव्यम् | तञ्चिष्यति | अतञ्चिष्यत् |
| ओव्रश्चू | - | व्रष्टा | व्रष्टुम् | व्रष्टव्यम् | व्रक्ष्यति | अव्रक्ष्यत् |
| | | व्रश्चिता | व्रश्चितुम् | व्रश्चितव्यम् | व्रश्चिष्यति | अव्रश्चिष्यत् |
| अञ्जू | - | अङ्क्ता | अङ्क्तुम् | अङ्क्तव्यम् | अङ्क्ष्यति | आङ्क्ष्यत् |
| | | अञ्जिता | अञ्जितुम् | अञ्जितव्यम् | अञ्जिष्यति | आञ्जिष्यत् |
| मृजू | - | मार्ष्टा | मार्ष्टुम् | मार्ष्टव्यम् | मार्क्ष्यति | अमार्क्ष्यत् |
| | | मार्जिता | मार्जितुम् | मार्जितव्यम् | मार्जिष्यति | अमार्जिष्यत् |
| क्लिदू | - | क्लेत्ता | क्लेत्तुम् | क्लेत्तव्यम् | क्लेत्स्यति | अक्लेत्स्यत् |
| | | क्लेदिता | क्लेदितुम् | क्लेदितव्यम् | क्लेदिष्यति | अक्लेदिष्यत् |
| स्यन्दू | - | स्यन्ता | स्यन्तुम् | स्यन्तव्यम् | स्यन्त्स्यते | अस्यन्त्यत |
| | | स्यन्दिता | स्यन्दितुम् | स्यन्दितव्यम् | स्यन्दिष्यते | अस्यन्दिष्यत |
| षिधू | - | सेद्धा | सेद्धुम् | सेद्धव्यम् | सेत्स्यति | असेत्स्यत् |
| | | सेधिता | सेधितुम् | सेधितव्यम् | सेधिष्यति | असेधिष्यत् |
| गुपू | - | गोप्ता | गोप्तुम् | गोप्तव्यम् | गोप्स्यति | अगोप्स्यत् |
| | | गोपिता | गोपितुम् | गोपितव्यम् | गोपिष्यति | अगोपिष्यत् |
| | | गोपायिता | गोपायितुम् | गोपायितव्यम् | गोपायिष्यति | अगोपायिष्यत् |
| त्रपूष् | - | त्रप्ता | त्रप्तुम् | त्रप्तव्यम् | त्रप्स्यते | अत्रप्स्यत |
| | | त्रपिता | त्रपितुम् | त्रपितव्यम् | त्रपिष्यते | अत्रपिष्यत |
| कृपू | - | कल्प्ता | कल्प्तुम् | कल्प्तव्यम् | कल्प्स्यते | अकल्प्स्यत |
| | | कल्पिता | कल्पितुम् | कल्पितव्यम् | कल्पिष्यते | अकल्पिष्यत |
| क्षमू | - | क्षन्ता | क्षन्तुम् | क्षन्तव्यम् | क्षंस्यते | अक्षंस्यत |
| | | क्षमिता | क्षमितुम् | क्षमितव्यम् | क्षमिष्यते | अक्षमिष्यत |

| | | | | | | |
|---|---|---|---|---|---|---|
| क्षमूष् | - | क्षन्ता | क्षन्तुम् | क्षन्तव्यम् | क्षंस्यते | अक्षंस्यत |
| | | क्षमिता | क्षमितुम् | क्षमितव्यम् | क्षमिष्यते | अक्षमिष्यत |
| अशू | - | अष्टा | अष्टुम् | अष्टव्यम् | अक्ष्यते | आक्ष्यत |
| | | अशिता | अशितुम् | अशितव्यम् | अशिष्यते | आशिष्यत |
| क्लिशू | - | क्लेष्टा | क्लेष्टुम् | क्लेष्टव्यम् | क्लेक्ष्यति | अक्लेक्ष्यत् |
| | | क्लेशिता | क्लेशितुम् | क्लेशितव्यम् | क्लेशिष्यति | अक्लेशिष्यत् |
| अक्षू | - | अष्टा | अष्टुम् | अष्टव्यम् | अक्ष्यते | आक्ष्यत |
| | | अक्षिता | अक्षितुम् | अक्षितव्यम् | अक्षिष्यते | आक्षिष्यत |
| तक्षू | - | तष्टा | तष्टुम् | तष्टव्यम् | तक्ष्यति | अतक्ष्यत् |
| | | तक्षिता | तक्षितुम् | तक्षितव्यम् | तक्षिष्यते | अतक्षिष्यत |
| त्वक्षू | - | त्वष्टा | त्वष्टुम् | त्वष्टव्यम् | त्वक्ष्यति | अत्वक्ष्यत् |
| | | तक्षिता | तक्षितुम् | तक्षितव्यम् | तक्षिष्यते | अतक्षिष्यत |
| गाहू | - | गाढा | गाढुम् | गाढव्यम् | घाक्ष्यते | अघाक्ष्यत |
| | | गाहिता | गाहितुम् | गाहितव्यम् | गाहिष्यते | अगाहिष्यत |
| गुहू | - | गोढा | गोढुम् | गोढव्यम् | घोक्ष्यति | अघोक्ष्यत् |
| | | गूहिता | गूहितुम् | गूहितव्यम् | गूहिष्यति | अगूहिष्यत् |
| | | गोढा | गोढुम् | गोढव्यम् | घोक्ष्यते | अघोक्ष्यत |
| | | गूहिता | गूहितुम् | गूहितव्यम् | गूहिष्यते | अगूहिष्यत |
| गृहू | - | गर्ढा | गर्ढुम् | गर्ढव्यम् | घर्क्ष्यति | अघर्क्ष्यत |
| | | गर्हिता | गर्हितुम् | गर्हितव्यम् | गर्हिष्यते | अगर्हिष्यत |
| तृन्हू | - | तृण्ढा | तृण्ढुम् | तृण्ढव्यम् | तृंक्ष्यति | अतृंक्ष्यत् |
| | | तृंहिता | तृंहितुम् | तृंहितव्यम् | तृंहिष्यति | अतृंहिष्यत् |
| तृहू | - | तर्ढा | तर्ढुम् | तर्ढव्यम् | तर्क्ष्यति | अतर्क्ष्यत् |
| | | तर्हिता | तर्हितुम् | तर्हितव्यम् | तर्हिष्यति | अतर्हिष्यत् |
| स्तृहू | - | स्तर्ढा | स्तर्ढुम् | स्तर्ढव्यम् | स्तर्क्ष्यति | अस्तर्क्ष्यत् |
| | | स्तर्हिता | स्तर्हितुम् | स्तर्हितव्यम् | स्तर्हिष्यति | अस्तर्हिष्यत् |

| | | | | | | |
|---|---|---|---|---|---|---|
| वृहू | - | वर्ढा | वर्ढुम् | वर्ढव्यम् | वर्क्ष्यति | अवर्क्ष्यत् |
| | | वर्हिता | वर्हितुम् | वर्हितव्यम् | वर्हिष्यति | अवर्हिष्यत् |

**रधादिभ्यश्च**(७.२.४५)- रध्, नश्, तृप्, दृप्, द्रुह्, मुह्, ष्णुह्, ष्णिह् एभ्यो वलाद्यार्धधातुकस्येड् वा स्यात्।

| | | | | | | |
|---|---|---|---|---|---|---|
| रध् | - | रद्धा | रद्धुम् | रद्धव्यम् | रत्स्यति | अरत्स्यत् |
| | | रधिता | रधितुम् | रधितव्यम् | रधिष्यति | अरधिष्यत् |
| नश् | - | नंष्टा | नंष्टुम् | नंष्टव्यम् | नंक्ष्यति | अनंक्ष्यत् |
| | | नशिता | नशितुम् | नशितव्यम् | नशिष्यति | अनशिष्यत् |
| तृप् | - | तर्प्ता | तर्प्तुम् | तर्प्तव्यम् | तर्प्स्यति | अतर्प्स्यत् |
| | | त्रप्ता | त्रप्तुम् | त्रप्तव्यम् | त्रप्स्यति | अत्रप्स्यत् |
| | | तर्पिता | तर्पितुम् | तर्पितव्यम् | तर्पिष्यति | अतर्पिष्यत् |
| दृप् | - | दर्प्ता | दर्प्तुम् | दर्प्तव्यम् | दर्प्स्यति | अदर्प्स्यत् |
| | | द्रप्ता | द्रप्तुम् | द्रप्तव्यम् | द्रप्स्यति | अद्रप्स्यत् |
| | | दर्पिता | दर्पितुम् | दर्पितव्यम् | दर्पिष्यति | अदर्पिष्यत् |
| द्रुह् | - | द्रोग्धा | द्रोग्धुम् | द्रोग्धव्यम् | ध्रोक्ष्यति | अध्रोक्ष्यत् |
| | | द्रोढा | द्रोढुम् | द्रोढव्यम् | ध्रोक्ष्यति | अध्रोक्ष्यत् |
| | | द्रोहिता | द्रोहितुम् | द्रोहितव्यम् | द्रोहिष्यति | अद्रोहिष्यत् |
| मुह् | - | मोग्धा | मोग्धुम् | मोग्धव्यम् | मोक्ष्यति | अमोक्ष्यत् |
| | | मोढा | मोढुम् | मोढव्यम् | मोक्ष्यति | अमोक्ष्यत् |
| | | मोहिता | मोहितुम् | मोहितव्यम् | मोहिष्यति | अमोहिष्यत् |
| स्नुह् | - | स्नोग्धा | स्नोग्धुम् | स्नोग्धव्यम् | स्नोक्ष्यति | अस्नोक्ष्यत् |
| | | स्नोढा | स्नोढुम् | स्नोढव्यम् | स्नोक्ष्यति | अस्नोक्ष्यत् |
| | | स्नोहिता | स्नोहितुम् | स्नोहितव्यम् | स्नोहिष्यति | अस्नोहिष्यत् |
| स्निह् | - | स्नेग्धा | स्नेग्धुम् | स्नेग्धव्यम् | स्नेक्ष्यति | अस्नेक्ष्यत् |
| | | स्नेढा | स्नेढुम् | स्नेढव्यम् | स्नेक्ष्यति | अस्नेक्ष्यत् |
| | | स्नेहिता | स्नेहितुम् | स्नेहितव्यम् | स्नेहिष्यति | अस्नेहिष्यत् |

**निरः कुषः** (७.२.४६) - निरः परात्कुषो वलादेरार्धधातुकस्य इड् वा स्यात्।

| | | | | | | |
|---|---|---|---|---|---|---|
| निर्+कुष् | - | निष्कोष्टा | निष्कोष्टुम् | निष्कोष्टव्यम् | निष्कोक्ष्यति | निरकोक्ष्यत् |
| | | निष्कोषिता | निष्कोषितुम् | निष्कोषितव्यम् | निष्कोषिष्यति | निरकोषिष्यत् |

**एते ३७ धातवो वेटः।**

**सेड्-धातवः**

अनिड्भ्यो वेड्भ्यश्चान्ये येऽपि सन्ति धातवः, ते सर्वे सेट एव। इयमिडागस्य औत्सर्गिकी व्यवस्था, सामान्यव्यवस्था वा। अग्रे विशेषेडागमा वक्ष्यन्ते। ते चैतां मनसि सम्यङ् निधायैवावगन्तुं शक्यन्ते।

**अयं सामान्येडागम उक्तः। विशेषेडागमः तत्तत्प्रत्ययप्रसङ्गे वक्ष्यते।**

{ { {